# ॥ अथ ब्रह्मपार स्तोत्रम् ॥

प्रचेतस ऊचुः
ब्रह्मपारं मुनेः श्रोतुमिच्छामः परमं स्तवम् ।
जपता कण्डुना देवो येनाराध्यत केशव ॥

सोम उवाच
पारं परं विष्णुरनन्तपारः
परः पराणामपि पारपारः ।
स ब्रह्मपारः परपारभूतः
परः परेभ्यः परमार्थरूपी ॥ १ ॥

स कारणं कारणतस्ततोऽपि
तस्यापि हेतुः परहेतुहेतुः ।
कार्येषु चैवं स हि कर्मकर्तृ
रूपैरशेषैरवतीह सर्वम् ॥ २ ॥

ब्रह्मप्रभुर्ब्रह्म स सर्वभूतो
ब्रह्म प्रजानां पतिरच्युतोऽसौ ।
ब्रह्माव्ययं नित्यमजं स
विष्णुरपक्षयाद्यैरखिलैरसङ्गी ॥ ३ ॥

ब्रह्माक्षरमजं नित्यं यथाऽसौ पुरुषोत्तमः ।
तथा रागादयो दोषाः प्रयान्तु प्रशमं मम ॥ ४ ॥

एतद् वै ब्रह्मपाराख्यं संस्तवं परमं पठन् ।

अवाप परमां सिद्धिं स समाराध्य केशवम् ॥ ५ ॥

॥ इति श्रीविष्णुपुराणे ब्रह्मपारस्तोत्रं संपूर्णम् ॥